મૃતસજીવન સ્તોત્રમ

એવમારધ્ય ગૌરીશં દેવં મૃત્જયમેશ્વરં ।
મૃતસજીવનં નામ્ના કવચં પ્રજપેત સદા ।।
સારાત સારતરં પુણ્યં ગુહ્યાદ્ગુહ્યતરં શુભં ।
મહાદેવસ્ય કવચં મૃતસજીવનામકં ।।
સમાહિતમના ભૂત્વા શૃણુષ્વ કવચં શુભં ।
શૃત્વૈતદ્દિવ્ય કવચં રહસ્યં કુરુ સર્વદા ।।
વરાભયકરો યજવા સર્વદેવનિષેવિતઃ ।
મૃત્યુજયો મહાદેવઃ પ્રાચ્યાં માં પાતુ સર્વદા ।।
દધાઅનઃ શક્તિમભયાં ત્રિમુખં ષડ્ભુજઃ પ્રભુઃ ।
સદાશિવોઽગ્નિરૂપી મામાગ્નેય્યાં પાતુ સર્વદા ।।
અષ્ટદસભુજોપેતો દણ્ડાભયકરો વિભુઃ ।
યમરૂપિ મહાદેવો દક્ષિણસ્યાં સદાવતુ ।।
ખડ્ગાભયકરો ધીરો રક્ષોગણનિષેવિતઃ ।
રક્ષોરૂપી મહેશો માં નૈરૃત્યાં સર્વદાવતુ ।।
પાશાભયભુજઃ સર્વરત્નાકરનિષેવિતઃ ।
વરુણાત્મા મહાદેવઃ પશ્ચિમે માં સદાવતુ ।।
ગદાભયકરઃ પ્રાણનાયકઃ સર્વદાગતિઃ ।
વાયવ્યાં મારુતાત્મા માં શઙ્કરઃ પાતુ સર્વદા ।।
શઙ્ખાભયકરસ્થો માં નાયકઃ પરમેશ્વરઃ ।
સર્વાત્માન્તરદિગ્ભાગે પાતુ માં શઙ્કરઃ પ્રભુઃ ।।
શૂલાભયકરઃ સર્વવિદ્યાનમધિનાયકઃ ।
ઈશાનાત્મા તથૈશાન્યાં પાતુ માં પરમેશ્વરઃ ।।
ઊર્ધ્વભાગે બ્રઃમરૂપી વિશ્વાત્માઽધઃ સદાવતુ ।
શિરો મે શઙ્કરઃ પાતુ લલાટં ચન્દ્રશેખરઃ ।।

ભ્રૂમધ્યં સર્વલોકેશસ્ત્રિણેત્રો લોચનેઽવતુ ।
ભ્રૂયુગ્મં ગિરિશઃ પાતુ કર્ણૌ પાતુ મહેશ્વરઃ ।।
નાસિકાં મે મહાદેવ ઓષ્ઠૌ પાતુ વૃષધ્વજઃ ।
જિહ્વાં મે દક્ષિણામૂર્તિર્દન્તાન્મે ગિરિશોઽવતુ ।।
મૃતુઞ્જયો મુખં પાતુ કણ્ઠં મે નાગભૂષણઃ ।
પિનાકિ મત્કરૌ પાતુ ત્રિશૂલિ હૃદયં મમ ।।
પઞ્ચવક્ત્રઃ સ્તનૌ પાતુ ઉદરં જગદીશ્વરઃ ।
નાભિં પાતુ વિરૂપાક્ષઃ પાર્શ્વૌ મે પાર્વતીપતિઃ ।।
કટદ્વયં ગિરીશૌ મે પૃષ્ઠં મે પ્રમથાધિપઃ ।
ગુહ્યં મહેશ્વરઃ પાતુ મમોરૂ પાતુ ભૈરવઃ ।।
જાનુની મે જગદ્ધર્તા જઙ્ઘે મે જગદમ્બિકા ।
પાદૌ મે સતતં પાતુ લોકવન્દ્યઃ સદાશિવઃ ।।
ગિરિશઃ પાતુ મે ભાર્યાં ભવઃ પાતુ સુતાન્મમ ।
મૃત્યુજયો મમાયુષ્યં ચિત્તં મે ગણનાયકઃ ।।
સર્વાઙ્ગં મે સદા પાતુ કાલકાલઃ સદાશિવઃ ।
એતત્તે કવચં પુણ્યં દેવતાનાં ચ દુર્લભમ ।।
મૃતસજીવનં નામ્ના મહાદેવેન કીર્તિતમ ।
સહ્સ્રાવર્તનં ચાસ્ય પુરશ્ચરણમીરિતમ ।।
યઃ પઠેચ્છૃણુયાન્નિત્યં શ્રાવયેત્સુ સમાહિતઃ ।
સકાલમૃત્યું નિર્જિત્ય સદાયુષ્યં સમશ્નુતે ।।
હસ્તેન વા યદા સ્પૃષ્ટ્વા મૃતં સજીવયત્યસૌ ।
આધયોવ્યાધ્યસ્તસ્ય ન ભવન્તિ કદાચન ।।
કાલમૃયુમપિ પ્રાપ્તમસૌ જયતિ સર્વદા ।
અણિમાદિગુણૈશ્વર્યં લભતે માનવોત્તમઃ ।।
યુદ્ધારમ્ભે પઠિત્વેદમષ્ટાવિશતિવારકં ।
યુદ્ધમધ્યે સ્થિતઃ શત્રુઃ સદ્યઃ સર્વૈર્ન દૃશ્યતે ।।

ન બ્રહ્માદીનિ ચાસ્ત્રાણિ ક્ષયં કુર્વન્તિ તસ્ય વૈ ।
વિજયં લભતે દેવયુદ્ધમધ્યેઽપિ સર્વદા ॥
પ્રાતરુત્થાય સતતં યઃ પઠેત્કવચં શુભં ।
અક્ષય્યં લભતે સૌખ્યમિહ લોકે પરત્ર ચ ॥
સર્વવ્યાધિવિનિર્મૃક્તઃ સર્વરોગવિવર્જિતઃ ।
અજરામરણો ભૂત્વા સદા ષોડશવાર્ષિકઃ ॥
વિચરવ્યખિલાન લોકાન પ્રાપ્ય ભોગાંશ્ચ દુર્લભાન ।
તસ્માદિદં મહાગોપ્યં કવચમ સમુદાહૃતમ ॥
મૃતસજીવનં નામ્ના દેવતૈરપિ દુર્લભમ ॥
॥ ઇતિ વસિષ્ઠ કૃત મૃતસજીવન સ્તોત્રમ ॥
www.shaivam.org